संस्कृत-पत्रिका | षष्ठसंकलनम् | जुलाईतः दिसम्बरपर्यन्तम् २०२२



# चिन्मय निर्झरिणी

चिन्मयविद्यालयः, बोकारो, झारखण्डः



गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।

गुरुरेव परं ब्रह्म तस्मै श्री गुरवे नमः।।

स्थावरं जङ्गमं व्याप्तं यत्किञ्चित् सचराचरम्।

तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः।।

चिन्मयं व्यापि यत्सर्वं त्रैलोक्यं सचराचरम्।

तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः।।

# अनुक्रमणिका


लेखाः 4-10

मम मातृभूमिः शौर्य ठाकुर,6C

प्रकृतिः सिल्वी सृष्टि,10C

विद्यालयस्य महत्वम् ऋत्विज, 8E

गजः अनुप्रिया, 10G

पुस्तकालयः अभिषेक मिश्रा,10D

आचारः प्रथमो धर्मः आर्यन सिंह, 9C

मम ग्रामः

पर्यावरणं

उद्यमशीला चटकाः

बालरचनाः 11-12

बालप्रमोदिनी 13-17

चित्रावली 18-19

मार्गम् दर्शयतु 20

अग्रिमप्रत्याः मुखपृष्ठम् 21



# लेखाः

## मम मातृभूमिः

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। मातृभूमिः जन्मतः आरभ्य मृत्युपर्यन्तम् अस्माकं रक्षणं पोषणं च करोति। माता भूमिः पुत्रोऽहं पृथिव्याः इति वेदवाक्यम् अस्ति। मातृभूमिः सर्वैः नरैः वन्दनीया भवति। येन केन प्रकारेण मातृभूमेः रक्षणं करणीयम्।

शौर्य ठाकुर

6C

## प्रकृतिः

प्रकृतिः माता सर्वेषाम्
बहूनाम् अपि फलानाम्
बहूनाम् अस्ति वृक्षाणाम्
पुष्पाणाम् चापि मातेयम्।

भ्रमरणां, पशूनां
पक्षिणां च मातास्ति
जनेभ्यः जीवनं सदा
ददाति प्रकृतिः माता।।

अस्ति सा तु मनोहरी
मातृणाम् अपि मातास्ति
प्रकृतिः माता सर्वेषाम्
नमोस्तु ते मात्रे प्रकृत्यै।।

सिल्वी सृष्टि

10 C

## विद्यालयस्य महत्त्वम्

विद्यार्थीजीवनस्य प्रारंभः शिशुविद्यालयात् भवति। तत् विद्यालयात् तत्पश्चात् च महाविद्यालयात् शिक्षां प्राप्नोति। विद्यालये छात्रान् विविधान् विषयान् पठन्ति। विद्यार्थीजीवने यादृशी शिक्षां प्राप्यते यान् संस्कारान् लभते तेषाम् उपयोगः समस्तजीवने सुखं भवति। विद्यालये छात्राणाम् शारीरिक मानसिक बौद्धिक आध्यात्मिक योग्यताविकासाय अहर्निशं प्रयतते। विद्यालयः छात्रः देशस्य आदर्शः नागरिकः रचयति। विद्यालये छात्राणाम् सत्यस्य पाठः पठन्ति। विद्यालयः अस्माकं गौरवास्पदम् अस्ति।

ऋत्विक कुमार

8E

# गजः

अयं हि विशालकायः जन्तुः अस्ति । अस्य वर्णं कृष्णं भवति श्वेतः गजः अपि दृश्यते । अयं हि हरितं काष्ठं, पत्रं, अन्नं च खादति । गजपालकः तं भोजयति, स्नापयति च । गजे गणेशमूर्तिः भवति । गणेशस्य इव अस्य पूजनं भवति । अयं भारं वहति । राजानः विशिष्टाः जनाः च गजारोहणं कुर्वन्ति । गजः शुण्डेन सर्वं कार्यम् करोति ।शुण्डया वृक्षाणां शाखाः त्रोटयति । शुण्डया सः खाद्यवस्तूनि मुखे निक्षिपति । शुण्डया जलं पिबति । हस्ती हस्तस्य सर्वं कार्यं शुण्डया करोति । अस्य दन्ताः, अस्थीनि, शरीरस्य सर्वाणि अंगानि च बहुमूल्यानि भवन्ति । अयम् अधिकं आतपं न सहते । हस्ती एकः अतीव दर्शनीयः पशुः अस्ति । अनेके हस्तिनः बहूनि कौतुकानी अपि कुर्वन्ति । गजानां विशालं शरीरं, गम्भीरं स्वभावं, मंदम्-मंदम् गमनम्, अनुशासन-पालनं च दृष्ट्वा मनसि महती प्रसन्नता भवति ।



अनुप्रिया

दशमी 'ज'

# पुस्तकालयः

यत्र विविधानि पुस्तकानि पठनार्थं संगृहीतानि भवन्ति तत् स्थानम् पुस्तकालयः उच्यते । तत्र हि त्रिविधः पुस्तकालयः व्यक्तिगतः, विद्यालयीयः, सार्वजनिकश्च । व्यक्तिगतः पुस्तकालयः अध्यापकानां अन्येषां बुद्धिजीविनाम् च भवति । विद्यालयीयः विद्यालयस्य अंगम् भवति । छात्राणाम् अध्यापकानाम् च ज्ञानवर्द्धनाय विद्यालयीयः पुस्तकालयः भवति । अत्र शैक्षणिकानि पुस्तकानि संगृहीतानि भवन्ति । निर्धन-छात्राणां कृते विद्यालयीयः पुस्तकालयः अत्युपयोगी भवति । सार्वजनिकेषु पुस्तकालयेषु बहुविधानि पुस्तकानि भवन्ति । पुस्तकालयसम्पर्कात् शनैः -शनैः विद्यारुचिः जागर्ति । सम्प्रति गीतशीलः पुस्तकालयः अपि अस्ति ।सम्प्रति गीतशीलः पुस्तकालयः अपि अस्ति । पुस्तकालायेषु प्रायेण बहुनां संग्रहः विधीयते ।निर्धन छात्राणा कृते विद्यालयीयः पुस्तकालयः अत्युपयोगी भवति ।पुस्तकालये बहुनि समाचारपत्राणि अपि आगच्छंति ।तस्य संचालनाय एका समितिः भवते । शिक्षाप्रचारस्य साधनेषु पुस्तकालयाना महत्वपुर्ण स्थान वर्तते । छात्राणम् अध्यापकानाम च ज्ञानवर्द्धनाय विद्यालयीयः पुस्तकालयः भवति ।

अभिषेक मिश्रा

नवमी 'ड'

# आचारः परमो धर्मः

अस्माकं भारतीया संस्कृति : आचार-प्रधाना अस्ति । आचारः द्विविधः भवति-दुराचारः सदाचारः च । सताम् आचारः सदाचारः इत्युच्यते। सज्जनाः विद्वांसो च यथा आचरन्ति तथैव आचरणं सदाचारो भवति । सज्जनाः स्वकीयानि इन्द्रियाणि वशे कृत्वा सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति । ते सत्यं वदन्ति, मातुः पितुः गुरुजनानां वृद्धानां ज्येष्ठानां च आदरं कुर्वन्ति तेषाम् आज्ञां पालयन्ति, सत्कर्मणि प्रवृत्ता भवन्ति ।

जनस्य समाजस्य राष्ट्रस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारस्याभ्यासो बाल्यकालादेव भवति । सदाचारेण नरः धार्मिकः, शिष्टो, विनीतो, बुद्धिमान् च भवति । संसारे सदाचारस्यैव महत्त्वं दृश्यते। ये सदाचारिणः भवन्ति, ते एव सर्वत्र आदरं लभन्ते यस्मिन् देशे जनाः सदाचारिणो भवन्ति तस्यैव सर्वतः उन्नतिर्भवति । अतएव महर्षिभिः " आचारः परमो धर्मः" इत्युच्यते। सदाचारी जनः परदारेषु मातृवत् परधनेषु लोष्ठवत्, सर्वभूतेषु च आत्मवत् पश्यति। सदाचारीजनस्य शीलम् एव परमं भूषणम् अस्ति ।

आर्यन सिंह

नवमी 'स'

# मम ग्रामः



भारतवर्षः गामप्रधानः देशः अस्ति। अधिकांशजनाः ग्रामेषु एव निवसन्ति। ग्रामीणानां दिनचर्या शोभना शिक्षाप्रदा च भवति। ग्रामेषु ग्रामीणाः जनाः प्रातः चतुर्वादने उतिष्ठन्ति। ग्रामेषु स्वच्छः वायुः प्रवहति। ग्रामेषु शुद्धं जलं, स्वच्छः वायुः, शुद्धं दुग्धम्, शुद्धं घृतम्, शुद्धाः खाद्यवस्तुनि च प्राप्यं भवन्ति। ग्रामेषु जीवनं अति सुंदरम् भवति।

# पर्यावरणं



पर्यावरणे शब्दद्वयम् अस्ति- परि+आवरणम्। पर्यावरणे वायुः,जलम्, अग्निः,आकाशः इत्यादयः च सन्ति। पर्यावरणस्य रक्षा सर्वेषां परं कर्तव्यं अस्ति। यस्मिन् स्थाने पर्यावरणं शुद्धं भवति तस्मिन् स्थाने जीवनं अपि सुखमयम् भवति। अतः पर्यावरणस्य रक्षा आवश्यकी वर्तते। अद्य जलस्य शुद्धिकरणस्य महती आवश्कता अस्ति। अधुना वायुः शुद्धं नास्ति। प्रदुषित पर्यावरणे विविधाः रोगाः जायन्ते। पर्यावरणरक्षायै वृक्षाः रोपणीयाः। वृक्षाः केवलं सौन्दर्याय नास्ति। वृक्षाः शुद्धं वायुं प्रसारयन्ति। वायुप्रदूषणस्य एकं प्रमुखंकारणमं यानस्य धूमं अपि अस्ति। जलं, वायुः आदयः इति प्राकतिकतत्वं प्रदुषितं अभवन्। प्रदूषणस्य अनेकानि कारणानि भवन्ति। अस्य जनसंख्या वृद्धिः मुख्यतमं कारणम् अस्ति। जूनमासस्य पन्चतमे दिवसे वयं विश्वपर्यावरण दिवसस्य आयोजनं कुर्मः। अतः पर्यावरणस्य जीवने अति महत्वपूर्णः स्थानं वर्तते।

# उद्यमशीला चटका

एकं वनम् आसीत्। कस्मात् अपि कारणात् वने भीषणः अग्निः प्राज्वालयत्। सर्वे जन्तवः भीताः अभवन् यत् इदानीं किं वयं करवामः। वने उपद्रवम् अभवत्। सर्वे जन्तवः इतस्ततः अधावन्। सर्वे परस्परं प्राणरक्षणाय प्रयत्नम् अकुर्वन्। तत्र एका चटका अपि आसीत्। सा तेषां सहायतां कर्तुं इच्छति स्म। सा एकम् उपायम् अचिन्तयत्। सा नद्याः जलं नीत्वा अग्नेः उपरि अक्षिपत्। सा तीव्रगत्या वारं वारं जलम् आनीय अग्नेः उपरि अक्षिपत्। सा श्रान्ता अभवत्। समीपे एकः उलूकः अतिष्ठत्। सः चटकम् अवदत्-" त्वं एतत् कार्यं किमर्थं करोषि? एतत् कृत्वा कोऽपि लाभः नास्ति।" तदा चटका अवदत्-"अहं जानामि यत् मम प्रयासेन किमपि परिवर्तनं न भवति, परंतु अहं स्वकर्तव्यं करोमि। अहं सर्वश्रेष्ठं प्रयासं दातुम् इच्छामि।" इदं श्रुत्वा उलूकः अपि प्रभावितः भूत्वा तस्याः सहायतां अकरोत्।

# बालरचना:
















# बालप्रमोदिनी

# क्रियापदज्ञानम



क्षिपति



पचति



वमति



सीव्यति



स्नाति



रोदिति



ददाति



लुनाति



नृत्यति

# वर्णज्ञानम



# शाकानि



मूलकम्



वृन्ताकः



कारवेल्लम्



मरीचिका



प्लाण्डुः



निष्पावः



लशुनः



आलुकम्



गृञ्जनकम्



# RIDDLES IN SANSKRIT

**प्रश्न 1:** किमिच्छति नर: काश्यां मूपानां को रणे हित:। को वन्य: सवदिवानां दीयतामेकमुत्तरम्।।

**उत्तर : मृत्युन्जय:।**

**प्रश्न 2:** न तस्यादि: न तस्यान्त: मध्ये य: तस्य तिष्ठति। तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद।।

**उत्तर : नयनम्।**

**प्रश्न 3:** दन्तैर्हीन: शिलाभक्षी निर्जीवो बहुमाषक:। गणस्यूति समृद्धोऽपि पसादेन गच्छति।।

**उत्तर :पादरक्ष।**

**प्रश्न 4:** सुतोअपि नेत्रे न निमीलयामि जलस्य मध्ये निवसानि नित्यम। स्वजातिजीमा मम् भोजनानि, वदन्तु मान्य: मम् नामधेयम्।।

**उत्तर : मत्स्य:।।**

**प्रश्न 6:** नान्न फलं वा खादामि, न पिबामि जलं किंचित। चलामि दिवसे रात्रौ, समय बोध्यामि च।।

**उत्तर : घटी।।**

**प्रश्न 7:** मेघश्यामो अस्मिन नो कृष्ण, महाकायोन पर्वत:।बलिष्ठोअस्मि भीमोअस्मि को अस्म्यहं नासिकाकर।।

**उत्तर : गजः।।**

# चित्रावली











# मार्गम् दर्शयतु





# चिन्मय

# निर्झरिणी

अग्रिमा प्रति कृते अधोलिखितअणुसङ्केतस्य उपरि

स्वरचनां प्रेषयन्तु

अणुसङ्केतम्- cvbokaro.gkrishna@gmail.com